# Aksharabrahma Stotram

# અક્ષરબ્રહ્મસ્તોત્રમ્

## Document Information

Text title : Aksharabrahma Stotram

File name : akSharabrahmastotram.itx

Category : deities_misc, svAminArAyaNa, gurudev, stotra

Location : doc_deities_misc

Author : achintyAnandabrahmachArI

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

# અક્ષરબ્રહ્મસ્તોત્રમ્

(શિખરિણી વૃત્તમ્)
યદ્રોમવિવરે લીના અણ્ડાનાં કોટ્યઃ પૃથક્ ।
તદક્ષરં ગુણાતીતં ગુણાતીતં નમામ્યહમ્ ॥ ૧॥

મહાધ્યાનાભ્યાસં વિદધતમજસ્રં ભગવતઃ
પવિત્રે સંપ્રાપ્તં સ્થિતિમતિવરૈ-કાન્તિકવૃષે ।
સદાનન્દં સારં પરમહરિવાર્તા-વ્યસનિનં
ગુણાતીતાનન્દં મુનિવરમહં નૌમિ સતતમ્ ॥ ૨॥

પરં માયોપાધેર્વિશદહૃદયે સ્વે પ્રતિદિનં
નિજાત્માનં શાન્તસ્ફુરદુરુ-મહોમણ્ડલવૃતમ્ ।
પ્રપશ્યન્તં શુદ્ધાક્ષર-મતિતરાનન્દ-નિલયં
ગુણાતીતાનન્દં મુનિવરમહં નૌમિ સતતમ્ ॥ ૩॥

શુભાવિર્ભાવાનાં સ્વહૃદિ સહજાનન્દમનિશં
નિદાનં પશ્યન્તં પ્રકૃતિપુરુષાદે-રધિપતિમ્ ।
હરિં તૈલાસાર-પ્રતિનિભમથાગ્રે નિજ દૃશોર્
ગુણાતીતાનન્દં મુનિવરમહં નૌમિ સતતમ્ ॥ ૪॥

હરિર્યસ્યોદાર-પ્રણયરશના-બદ્ધચરણો
યતો નૈતિ પ્રેષ્ઠાત્ ક્વચિદપિ પૃથગ્ભાવમજિતઃ ।
યથા શબ્દાદર્થો નિજવિમલચિત્તાદપિ વિયત્
ગુણાતીતાનન્દં મુનિવરમહં નૌમિ સતતમ્ ॥ ૫॥

સ્થિતો માતુર્ગર્ભે હરિમવિરતં યોઽક્ષરપરં
ચિદાનન્દાકારં લલિતવસનાલઙ્કૃતિધરમ્ ।
અપશ્યત્પુણ્યાક્ષં વિધુમિવ ચકોરઃ શુચિરુચિં
ગુણાતીતાનન્દં મુનિવરમહં નૌમિ સતતમ્ ॥ ૬॥

અનાકૃષ્ટાત્મા યો ભુવનવિષયૈ-રપ્યતિવરૈ-
રલિપ્તત્વેનાસ્થાદિહ મતિમુષસ્તાનધિગતઃ ।
યથા વાયુશ્ચાભ્રં વડવદહને વાબ્ધિનિલયો
ગુણાતીતાનન્દં મુનિવરમહં નૌમિ સતતમ્ ॥ ૭॥

જનૌઘેષ્વેકાન્તં વૃષમખિલ-દોષાર્તિશમનં
સુભદ્રં સચ્છાસ્ત્રપ્રતિભણિત-નિર્વાણસરણીમ્ ।
તતાનાત્મપ્રેષ્ઠં પુરુકરુણયા મોહદલનં
ગુણાતીતાનન્દં મુનિવરમહં નૌમિ સતતમ્ ॥ ૮॥

સ્ફુરત્સ્ફારજ્ઞાનામૃત-વિપુલવૃષ્ટ્યાતિ-સુખદો
દુરાપૈર્યુક્તો યઃ શ્રુતિનિગદિતૈઃ સદ્ગુણગણૈઃ ।
વિધું નિન્યે લજ્જાં જનવિવિધ-તાપોપશમને
ગુણાતીતાનન્દં મુનિવરમહં નૌમિ સતતમ્ ॥ ૯॥

જનાજ્ઞાનધ્વાન્ત-ક્ષપણકરણાત્ તીક્ષ્ણકિરણં
હ્રિયં નિન્યે સ્વેક્ષા-દુરિતદલનો યો મૃદુમનાઃ ।
મહૈશ્વર્યૈર્યુક્તો હરિપર-તરાનુગ્રહતયા
ગુણાતીતાનન્દં મુનિવરમહં નૌમિ સતતમ્ ॥ ૧૦॥

પ્રસઙ્ગં યસ્યૈત્યાજગતિ નનુ જાતા જનગણા
બૃહદ્રૂપા ભૂપા હરિપુરુતરધ્યાન-નિરતાઃ ।
વિરક્તા રાજ્યાદૌ શુભગુણયુતાશ્ચાતિસુખિનો
ગુણાતીતાનન્દં મુનિવરમહં નૌમિ સતતમ્ ॥ ૧૧॥

યદુક્તાં સદ્વાર્તાં ભવભયહરાં શ્રોતુમનિશં
સમાયન્ સદ્વ્રાતા બહુજનપદેભ્યો હરિજનાઃ ।
મરાલા ભૂયાંસઃ સમુદમિવ સન્માનસ-સરો
ગુણાતીતાનન્દં મુનિવરમહં નૌમિ સતતમ્ ॥ ૧૨॥

યદાવાસે માર-પ્રણયરસ-લોભાદિરિપવઃ
પ્રવેષ્ટું નો શેકુર્વિજિતવિધિમુખ્યા બહુમદાઃ ।
મુનીન્દ્રૈસ્તં માન્યં શુભસકલ-તીર્થાસ્પદપદં
ગુણાતીતાનન્દં મુનિવરમહં નૌમિ સતતમ્ ॥ ૧૩॥

મહાશ્રદ્ધોપેતં મુનિગુરુવરં સ્વક્ષરતનું
હરેર્ભક્ત્યાદૌ દ્રાગ્ભવભયભિદં સ્વેક્ષણકૃતામ્ ।

પ્રશાન્તં સાધુત્વા-વધિમતુલકારુણ્ય-નિલયં
ગુણાતીતાનન્દં મુનિવરમહં નૌમિ સતતમ્ ॥ ૧૪॥

મુહુર્યસ્મૈ પ્રાદાત્ પુરુમુદમિતો યદ્વરગુણૈર્
હરિર્હારાન્ પૌષ્પાન્નિજતનુધૃતાનઙ્ગદમુખાન્ ।
સ્વભુક્તં સદ્ભોજ્યં વરવસનમુખ્યં સ્વવિધૃતં
ગુણાતીતાનન્દં મુનિવરમહં નૌમિ સતતમ્ ॥ ૧૫॥

અનેકેભ્યઃ સદ્ભ્યો વિમલ-હરિવિજ્ઞાનદદતં
ભુવિ બ્રાહ્મીં વિદ્યાં હરિવચનરૂપામુદયતમ્ ।
હરિધ્યાનાસક્તં શુભગુણમનાદ્યક્ષરમહં
ગુણાતીતાનન્દં સકલગુરુમીડે મુનિવરમ્ ॥ ૧૬॥

ઇતિ શ્રી અચિન્ત્યાનન્દબ્રહ્મચારીવિરચિતં અક્ષરબ્રહ્મસ્તોત્રં સમ્પૂર્ણમ્ ।

*Aksharabrahma Stotram*

pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*